✧˖°*❋ ❋*°˖✧

# નવ દુર્ગા સ્તોત્રમ્

# Nava Durga Stotram
## in gujarati

✧˖°*❋ ❋*°˖✧

# ॥ નવ દુર્ગા સ્તોત્રમ્ ॥

**ગણેશઃ**
હરિદ્રાભંચતુર્વાદ્દુ હારિદ્રવસનંવિભુમ્ ।
પાશાંકુશધરં દૈવંમોદકંદંતમેવ ચ ॥

**દેવી શૈલપુત્રી**
વંદે વાંછિતલાભાય ચંદ્રાર્ધકૃતશેખરાં।
વૃષારૂઢાં શૂલધરાં શૈલપુત્રી યશસ્વિનીમ્ ॥

**દેવી બ્રહ્મચારિણી**
દધાના કરપદ્માભ્યામક્ષમાલા કમંડલૂ ।
દેવી પ્રસીદતુ મયિ બ્રહ્મચારિણ્યનુત્તમા ॥

**દેવી ચંદ્રઘંટેતિ**
પિંડજપ્રવરારૂઢા ચંદકોપાસ્ત્રકૈર્યુતા ।
પ્રસાદં તનુતે મહ્યં ચંદ્રઘંટેતિ વિશ્રુતા ॥

**દેવી કૂષ્માંડા**
સુરાસંપૂર્ણકલશં રુધિરાપ્લુતમેવ ચ ।
દધાના હસ્તપદ્માભ્યાં કૂષ્માંડા શુભદાસ્તુ મે ॥

**દેવીસ્કંદમાતા**
સિંહાસનગતા નિત્યં પદ્માશ્રિતકરદ્વયા ।
શુભદાસ્તુ સદા દેવી સ્કંદમાતા યશસ્વિની ॥

**દેવીકાત્યાયણી**
ચંદ્રહાસોજ્જ્વલકરા શાર્દૂલવરવાહના ।
કાત્યાયની શુભં દધાદેવી દાનવઘાતિની ॥

## દેવીકાલરાત્રિ

એકવેણી જપાકર્ણપૂર નગ્ના ખરાસ્થિતા ।
લંબોષ્ઠી કર્ણિકાકર્ણી તૈલાભ્યક્તશરીરિણી ॥

વામપાદોલ્લસલ્લોહલતાકંટકભૂષણા ।
વર્ધનમૂર્ધ્વજા કૃષ્ણા કાલરાત્રિર્ભયંકરી ॥

## દેવીમહાગૌરી

શ્વેતે વૃષે સમારૂઢા શ્વેતાંબરધરા શુચિઃ ।
મહાગૌરી શુભં દદ્યાન્મહાદેવપ્રમોદદા ॥

## દેવીસિધ્ધિદાત્રિ

સિધ્દગંધર્વયક્ષાદ્યૈરસુરૈરમરૈરપિ ।
સેવ્યમાના સદા ભૂયાત્ સિધ્ધિદા સિધ્ધિદાયિની ॥

✧ₓ⋯⋯°*❋ ❋*°⋯⋯ₓ✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net